ŚRĪ
ŚṚṄGĀRALĪLĀTILAKABHĀNA

EDITED BY

K. Rama Pisharoti, M. A., L. T.

Professor & Head of the Department of Samskrit,
Annamalai University, Annamalainagar;
Editor of the Śrī Mukundamālā,
Uttararāmacaritakāvya,
Candrikā, etc.

(All rights reserved by the Editor)

CALCUTTA
1934

1 sh.] [*Price Ten Annas*

Printed at the Calcutta Oriental Press,
9, Panchanan Ghose Lane and

Published by
J. C. Chatterjee, B. A.
Of

J. C. Chatterjee & Co.
61A Ramkanto Bose Street, Calcutta.

To
The Beloved Memory
Of
Sarojini and Radha

Introduction

The *Śṛṅgāralīlātilaka* that is here published is the work of the boy-poet Bhāskara. The *Sthāpanā* definitely says that the author wrote the work before he was sixteen years old. It won the approval of the scholars at the court of Śrī Vikramadeva of Calicut. So far as is now available, no other work of this precocious boy poet has survived to tell us about the development of his genius.

From a *prima facie* point of view one would incline to assign the poet to the court of the great Vikrama of Calicut who graced the masnad at the dawn of the fifteenth century and at whose court flourished a host of poets and scholars headed by Uddaṇḍa, the author of the *Mallikāmāruta*, Cennos Nārāyaṇan Nampūtiripād, the author of the *Tantrasamuccaya*, and Kakkaśśeri Bhaṭṭatiri, the author of the *Vasumatīvikrama*. Such an assumption is perfectly in place, regard being had to the description of the court as given in the *Sthāpanā*.

This assumption is, however, unsupported by local traditions. These would have it that the boy-poet Bhāskara was a scion of the Nampūtiri[2] family, called Mutukurśi

1 The court of Vikrama had in it nineteen brilliant gems, eighteen Samskrit poets and one Malayalam poet, and the greatest scholar of the day was by common consent the famous Uddaṇḍa, the author of the *Mallikāmāruta*. This galaxy of literary luminaries is well-known as the "*patinettarakkavikal*," the eighteen and a half poets, the Malayalam poet being treated as being only a half. Among them was Kakkaśśeri Bhaṭṭatiri who even as a boy wrested from Uddaṇḍa the much coveted annual first prize.

2 This Nampūtiri family has been from times past the seat of advanced *Vaiyākaraṇa* studies in Kerala, and at present possesses a very valuable manuscript library. It is held a source of honour for a *Vaiyākaraṇa* to say that he traces his *Vyākaraṇa*

Mana, near Shoranur, and is identical with the well-known Mutukurśi Uṇṇi. From his boyhood even, he figured as a prodigy and a great wit. His was a short life and he is reported to have passed away in the thirty-second year of his life in 1012 M. E., corresponding to 1836-37 A. D. He was patronised by the Zamorin of Calicut as well as by the Mahārāja of Cochin and at the courts of both he was an honoured and welcome guest. His early education he appears to have had in his own house ; from there he migrated to Kūṭallūr Mana for studying *Vyākaraṇa* and from there again to Trippunithura for studying *Vedānta*. In both these *Śāstras* he appears to have attained some Pegree of proficiency. His last days he spent at the court of the Zamorin and he is reported to have died suddenly while performing his daily rites in the Tali temple at Calicut. This great and precocious genius is remembered not so much for his poetic talents or *Śāstric* attainments as for his wit and humour, and in this field, if tradition is to be believed, he stands unrivalled.

Bhāskara is no doubt the product of his age. The period from 1750 to 1850 marks a great renaissance of Kerala Literature, both Samskritic and Malayalam. In the field of Samskrit, we have a number of distinguished poets and dramatists and *Śāstric* scholars: Balarāmavarma, the great authority on histrionics and the author of the *Bālarāmabhāratam*, and the Svāti Tirunal Mahārāja, both of the royal family of Travancore, Rāma Varma and Rāma Varma[3] of the royal family of Cochin, Maṇi

studies to this ancient family. Till very recently the family was maintaining its foremost position as a centre of Samskritic studies in Kerala. Here Patañjali is reported to be daily worshipped.

3 The two brothers were ardent followers of the Dvaita system. Both were very religious and the younger one was also a great poet. These princes were responsibls for the Samskritic revival at Trippunithura.

Tampuran[4] and Manoramā Tampurāṭṭi[5] of the royal family of Calicut, Vidvān Elaya Raja of Cranganore,[6] Rāma Pāṇivāda[7] and Rāghava Pāṇivāda,[8] dramatist

4 Maṇi Tampuran was so called because he was the first among Malayalis to study the *Nyāya* treatise, *Cintāmaṇi*. He may be identified with the Vikramadeva mentioned in the Bhāṇa. He completed his *Śāstric* studies at Benares.

5 A close relative and contemporary of Maṇi Tampuran was Manoramā Tampuraṭṭi, so termed because this princess of the Zamorin family was the greatest exponent of the *Manoramā* in her days. Tradition holds her in high esteem and she is accorded a very honoured position among the Kerala *Vaiyākaraṇas*. Her *satīrthya* was Kuñjiṭṭi Rāghavan Nampiar, who later was the court scholar of Rāma Varma of Cochin, and her disciple was Ārūr Aṭitiri, the author the of *Uttaranaiṣadhīya* and the teacher of Vidvān Elaya Tampuran of Cranganore.

6 Vidvān Elaya Tampuran of Cranganore figures more as a poet than as a scholar. According to discerning critics, he stands the foremost poet of Kerala in the nineteenth century. With the intensive *Śāstric* studies thus begun at Cranganore, it soon became an important centre for advanced studies in almost all branches of learning, a position which it retained till very recently.

7 Rāma Pāṇivāda was the most outstanding figure in the literary horizon of Samskrit in Kerala in the 18th century. He figures as a great poet and dramatist. He is the author of a number of works, none of which except one has been published ; and these are:—(A) Rūpakas : i. *Candrikā*—a *Vithi;* ii. *Līlāvatī*—a *Vithi;* iii. *Madanaketucarita*—a *Prahasana;* and iv. *Sītārāghavanāṭaka;* (B) Kāvyas: i. *Viṣṇuvilāsa* ; ii. *Mukundaśataka;* iii. *Śivaśataka* and iv *Rāghavīya*, (C) *Śāstric* works i. *Vivaraṇa* a commentary on the *Dhātuvṛtti;* ii. *Rāsakriḍā;* iii. *Vṛttamañjarī;* iv. *Bālapāṭhya* on the *Rāghavīya;* and v. *Vilāsinī*, a commentary on the *Śrīkṛṣṇavilāsa*. All these are very important works and attest alike to the author's erudition as a scholar and eminence as a poet. From internal evidence it is clear that the poet must have been living in 1756-57, for his drama, *Sītārāghavanāṭaka*, he wrote at the command of the famous Mārtaṇḍa Varman in connection with the first *Murajapam*.

8 Rāghava Pāṇivāda was the uncle of Rāma Pāṇivāda; he is reported to be the author of the kāvya *Rāghaviya*.

and poet, Ārūr Aṭitiri,[9] the author of the *Uttara-naiṣadhīya*, Kuñjiṭṭi Rāghavan Nampiar and Pantalam Subrahmaṇiya Śāstrī,[10] the premier grammarian of Kerala. Thus every court in Kerala from Calicut in the north to Trivandrum in the south was a centre of Samskritic culture and each court had its own coterie of scholars and poets. In spite, therefore, of the great political commotion and travail that the land was exposed to consequent upon the invasions of the Tigers of Mysore, in spite of the general lack of security of life and property, there was a great revival of learning and this revival affected both Samskrit and Malayalam. For the period also saw the blooming forth of the geniuses of the two outstanding figures in the realm of Malayalam literature, Kuñjan Nampiar and Uṇṇayi Warier. The works of these and a host of other luminaries raised the status of the spoken vernacular. The general political disquiet may not have produced this flowering of geniuses, but surely it led to the bringing together of the various scholars and poets scattered about in various parts of Kerala, and their mutual emulation led to the awakening and founding on a permanent basis of Samskrit and vernacular learning which has continued ever since. Here then we have another instance of literary revivals following in the wake of political turmoils. The torch of learning then lit has been burning all these hundred years, and

9 Ārūr Aṭitiri. See note 6.

10 Pantalam Subrahmaṇia Śāstrī was the contemporary of the very well-known Dharma Rāja of Travancore, the immediate successor of His Highness Raja Mārtaṇḍa Varman. His court was the magnet which attracted unto it all the great scholars and poets of the day. Śāstrī is reported to be the direct disciple of a direct disciple of Nagoji Bhaṭṭa, and he was undoubtedly the premier grammarian of his time in all Kerala.

every reputed Malayali scholar traces his scholarship to one or other of those luminaries and the present Samskrit College at Trippunithura may well be said to be the lineal descendant in modern form of that revival.

The contributions of the period touched almost all departments of Samskritic culture and we have poems and dramas and scientific treatises, but judging from number we have more of *Bhāṇas* in the realm of *Rūpakas* than any other variety. The cause of this partiality may partly be found in the popularity of *Tullal*, organised by Kuñjan Nampiar, with which it has something in common.

The Bhāṇa that is published here is an eminently poetic one and even though it was produced when the author was in his teens, it bears unmistakable traces of real genius. There are no doubt some grammatical lapses, but these are due to the immaturity of his scholarship. *Śakti* and *Nipuṇatā* are there, only *Śāstrāvekṣaṇa* is wanting. The author is endowed with great poetic genius and a facile command of language, not unworthy of a mature intellect and at every stage reveals clear traces of the influence of the prince of Indian bards Kālidāsa and the great scholarly poet Harṣa.

In concluding, it is my pleasant duty to thank my friend Mr. Kshitish Chandra Chatterjee, M. A, for the great help he rendered in getting this edition published. I am also obliged to him for adding the valuable foot-notes.

Annamalai University,
Annamalainagar K. Rama Pisharoti.
20th November' 34

11 The literary history of the period from 1750 to 1850 A. D. forms a very interesting chapter in the history of Kerala contribution to Samskrit Literature. The writer is preparing a paper on this subject.

शृङ्गारलीलातिलकः

श्रीरस्तु

(नान्द्यन्ते सूत्रधारः)

सूत्रधारः—

स्वस्यां विश्वसृजो मनो दुहितरि व्यापारयामास यो
मध्येवारिधि वद्धवान रघुपतिस्सेतुं च यद्वैभवान् ।
नष्टाङ्गोऽपि चकार नष्टतपसं यश्चन्द्रचूडामणिं
सोऽयं चापभृतां वरो विजयते विश्वैकवीरः स्मरः ॥१॥

अपि च,

इन्दिरानवकटाक्षलोभिनो मन्दमेव गलिता गदाभृतः ।
कुन्दकुड्मलसिता स्मितप्रभा कन्दमुत्खनतु कल्मषस्य वः ॥२॥

(सहर्षम्) सर्वथा सिद्धार्थाः स्मः यद्वयमभिनयगीतवाद्यित्रनृत्तादिरसार्णवनिमज्जनोन्मज्जनस्खलनप्लवनजनितमदमत्तमनीषिभिर्देवस्य विक्रमभूपतेर्लीलाटिकैः परिपूर्णया परिषदा सबहुमानं समादिष्टास्स्मः यथा—"सखे, सकलविधरूपकनिरूपणनिपुण ! अधरीकृतामृतधारा मधुरमधुनिष्यन्दनी तत्रभवतो भास्करकवेर्भाणरूपा भारती भवतैवाभिनयविषयीक्रियताम्" इति। तद्यावदात्मीयां ताम्रवर्णीमाहूय संगीतकृत्ये नियोक्ष्ये। (नैपथ्याभिमुखमवलोक्य) अर्ये, अस्माद्दशोचितविद्यामुक्तावलीताम्रवर्णि ताम्रवर्णीतस्तावदागम्यताम् ।

(प्रविश्य नटी)

नटी—अ०अ इअंम्हि । अणंतरकरणि० [?] आणवेहि । (आर्य, इयमस्मि । अनन्तरकरणीयमाज्ञापय ।)

सूत्रधारः—प्रवर्तमानमृतुमधिकृत्य प्रस्तूयतां संगीतकम्। किमन्यत् परिषदः प्रथमप्रसादनसाधनम्।

नटी—तह (तथा)। (गायति)

ए०काणं हिअआणं पिऊसं कालकूटमण्णाणो।
मलअमंदाणिलओ मअणामंचाउ वेइ मी उववणे ॥३॥

[एकेषां हृदयानां पीयूषं कालकूटमन्येषाम्।
मलयमन्दानिलो मदनामात्यो वात्यस्मिन्नुपवने॥]

सूत्रधारः—(सशिरःकंपम्) साधु संगीतकं येनाकृष्यमाणचित्ता इव लक्ष्यन्ते पारिपार्श्याः।

नटी—होदु। अ०अ किं मुदं तुए कइमस्सि णिवन्धणे अज्जमिस्साणं अणुराओत्ति। (भवतु। आर्य किं श्रुतं त्वया क[तम]स्मिन् निबन्धने आर्यमिश्राणामनुराग इति)

सूत्रधारः—आर्ये श्रूयताम्। अस्ति केरलेषु भास्करनामा कविवरः।

नटी—(सादरम्) तेण हि तं ए०व पु०वं व०णेदु। (तेन हि तमेव पूर्वं वर्णयतु।)

सूत्रधारः—(निश्वस्य) अवर्णनीयमप्यस्मद्दशैराचार्य इत्येतावदेतन्मनुवर्णयामि।

वाग्देवताकेलिरङ्गभूमीकृतमुखाम्बुजः।
सोऽयं देव्या च मेदिन्या तिलकत्वेनधार्यते ॥४॥

अपि च,

अम्भोधिगम्भीरमनिरूपयोऽशहायनः।
शृङ्गारलीलानुभवो यस्य प्राग्जन्मजः किल ॥५॥

तेन च कविना,

गुणदोषकपास्तत्र सन्तो वक्ष्यन्ति तत्त्वतः।
अनद्विदां मत्सरिणां हासो नाऽऽदरगोचरः ॥६॥

इतिपूर्वकं प्रबद्धमिदं श्रीविक्रमदेवेन राजराजोपनेन राजराजेनानेक-

कविभिरानीयोपायनीकृतेषु निबन्धनेषु निर्धार्य नियुक्तमित्यार्य-मिश्राणामाज्ञापना।

नटी—अ०छरिअं अ०छरिअं। सो कइ उपसोलसहायणो०ति अ०च०भुदं। अहवा पंचसदिअससमु०भिण्णा वि म०लिआए अहिरामो आमोदो पसूण०स। (आश्चर्यमाश्चर्यम्। स कविरुपषोडशहायन इत्यत्यद्भुतम्। अथवा पञ्चपदिवससमुद्भिन्नाया अपि मल्लिकाया अभिराम आमोदः प्रसूनस्य)

सूत्रधारः—अथ किम्।

(नैपथ्ये)

युवयोरयं भागिनेयो भर्गदासः प्रथमरंगप्रवेशकुतूहलकण्टकितकलेवरोऽभिनवभाणाभिनयानुरूपिकां भूमिकामादायाऽलंकुरुते नैपथ्यद्वारभूमिम्।

सूत्रधारः (श्रुत्वा नैपथ्याभिमुखमवलोक्य) अये अयमित एवावनिष्टते वत्सः। (तं प्रति) वत्स, रमणीयतर एव तेऽयं वेषः। तथाहि,

स्निग्धांगरागच्छुरिताङ्गयष्टिर्मुग्धाङ्गनापाङ्गचकोरचन्द्रः।
कौसुंभवासाः कनकांशुकोद्यदुष्णीषबन्धो धृतवेत्रदण्डः ॥७॥

वत्स, का पुनस्तवाभिनयानुसारिणी गाथकी। (पुनस्सस्मितम्) ज्ञातैव विदितमेवैतत्।

पृष्टमात्रे मया यत्तं दृष्टिरासीदधोमुखी।
प्रत्यङ्गपुलकोद्भेदैः स्वेदैश्चालंकृतं वपुः ॥८॥

भवतु प्रवेशानन्तरं प्रथममभिनेयमिदानीमेव प्रस्तुतम्। (नटीं प्रति) आर्ये नन्वावामप्यन्तेवासिप्रतिभावितप्रयोगप्रकाशप्रेक्षणकुतुकिनौ तावत् प्रेक्षकावेव भवावः।

नटी—अ०अ मणवि एदं ए०व व०तुं आर०धं (आर्य मयाऽप्येतदेव वक्तुमारब्धम्।

(निष्क्रान्तौ)

स्थापना।

(ततः प्रविशति विटः)

विटः—(स्वशरीरं विलोक्य ईषल्लज्जां निरूप्य)

प्रभातवातेन पयोजगन्धिना प्रबोधितोऽहं प्रियया उपगूहितः ।
गतोऽस्मि रोमाङ्कुरकंचुकावृतं वपुस्तदग्रापि तथाविधं स्थितम् ॥९॥

(प्राचीं दिशं विलोक्य) अये, ततः प्रभृति नातीवातीतस्समयः । कुतः,

पूर्वाब्धौ विनिमज्ज्य तामसमलं संमार्ज्य रक्तांशुकं
धृत्वा वासवपत्नियाः* च ककुभा सख्या समं सांप्रतम् ।
संक्रेतं चरमेतराचलमहाशृङ्गाग्रमासेदुषी
कान्तस्यांशुमतः प्रतीक्षत इव प्राप्तिं दिनश्रीरियम् ॥१०॥

अपि च,

लोलेक्षणाः किल समाकुलमीनजालां
निष्पिष्टकोरककुलां मृदितस्तनाश्च ।
अभ्युल्लसत्कमलचञ्चलचञ्चलीकां
लोलालकावलिविराजितवक्त्रलक्ष्म्यः ॥११॥

भ्रष्टावशिष्टकुचकुंकुमरूपिणांग्यः
किंजल्कपुञ्जशबलां† कमलायताक्ष्यः ।
निर्यान्ति केलिनिलयेभ्य इमा हसन्त्यः
कल्लोलिनीं मदमनंगजभुक्तमुक्ताम् ॥१२॥

* "अपि माषं मषं कुर्याच्छन्दोभङ्गं न कर्हिचित्" इति वचनादियङ् । तथाच कुमारसम्भवे कालिदासः—वियत्पतिं संयमिनं ददर्श । यद्वा वासवपत्नीवाचरति इति पत्नीयति: क्विपि निष्पन्नस्य पत्नीशब्दस्य ततोऽकिवचने रूपम् । क्विबन्तस्य धातुत्वानदायात् "अचिश्नु धातु—" इति इयङ् ।

† एतच्छिन्नाम् । "अनतो ङीष्" (पा० ४।१।४०) इति ङीप्विधानात् । तथाच काव्यालङ्कारसूत्रवृत्तौ वामनः—शबलादिभ्यः स्त्रियां टाप्प्राप्तिः (५।२।४६) इति ।

अहो, अहं पुनः प्रियतमावियोगादियन्तं समयं महान्तमजीगणम्। तथाहि,

विरहे प्राणनाथानां क्षणो यूनां हि वत्सरः।
मेलने हारलतया व्यवधानं महाद्रिणा ॥१३॥

(सचिन्तं निश्वस्य) कथमेवं सति सखा सत्यकेतुस्सारसिकाऽसङ्गमं सहते। सत्यमेव मयाऽसह्यमदनवेदनासन्दह्यमाननतनुर्दृष्टः।

कलयन् कुवलयमालां म्लानां निश्वासवायुना वलयन्।
निजया किल तनुलतया तनुतावलनस्तुलां नीताम् ॥१४॥

अपि च, अरे कुसुमायुध, यत्त्वं भुवनैकधनुर्धरो मदन इति श्रूयसे तन्नोपपद्यते। कुतः,

अलसमुकुले निद्राभङ्गादधीरकनीनिके
वलनविलसद्वक्त्राम्भोजं मुहुर्मुहुरीक्षणे।
उपहतवती यत्सा तेनैव मां निभृतं हतं
विकिरसि शरैरेवं वीरः पुमान् विदधाति किम् ॥१५॥

एवमादिकमनेकमसंवन्धमालपन अग्रगतं मां विवृतद्वारायितया* विरहवेदनयाऽचकथत्—सखे भद्रसेन

पुराऽपतिष्टामृतविन्दुना समः कटाक्षपातो मयि यस्सुखावहः।
स एव शल्योपमतां गतोऽधुना परो रिपुर्नाम पराङ्मुखो विधिः ॥१६॥

मया तु तदा 'कया पण्डितया ते गण्डसीमा पाण्डिम्ना मण्डिता' इति पृष्टेन तेनैवमेव प्रतिपन्नं 'सत्यं सौदामनीसलिलमादातुकामोऽस्मि' इति। अहं पुनरपि निर्वन्धाय प्रवृत्तः—'सखे मा मैवम्।

यूनामनुरागजुषां संघटने पटुतरोऽस्मि वेत्सि न किम्।
अपि च तवापर आत्मा भद्रमना भद्रसेन एव न किम् ॥१७॥

* तथाच कुमारसम्भवे कालिदासः—"स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते" इति।

† अपतिष्टं ति पदं चिन्त्यम्, पतनेः परस्मैपदित्वात्।

तत्सर्वं सत्यं संभावयसि*। इदानीं किं धिक्कृतधराधरं धैर्यं धारयसि' इति। तेन पुनः 'अन्यस्मै कस्मै वयस्याय व्याख्यास्ये' इतिपूर्वकं सर्वं संक्षिप्य समुदीरितम्। मया प्रतिश्रुतञ्च,

सिद्धसाध्यं करिष्ये त्वामुत्तरेऽहन्यहं न चेत्।
कार्तान्त्यां दिशि मार्त्ताण्ड† उदेष्यति न संशयः ॥१८॥

इति। इदानीं मे हृदं तु बहुधायें वर्तते—

स्वकौशलं फलयति वा पयोजभूः
कथन्तु वा मनसिभुवो मनोरथः।
भवान्तरे कृतसुकृतौ किमेतकौ
कथं विधेर्विलसितमस्मदुद्यमे ॥१९॥

(सोद्वेगम्) अथवा कृतं सन्देहेन।

माध्वीकधाराधिकमाधुरीक-
वाग्धाटिकातूलिकयाऽस्य रूपम्।
पूर्वाधिकश्रीकमहं वितन्वलँ-
लिखामि तस्याः खलु चित्तभित्तौ ॥२०॥

अथ तदर्थमेव सन्नह्ये। (परिक्रामन विचिन्त्य) अथवा चित्रसेनस्तावदिमामवस्थान्न वेद। स खलु विरते दिने मया नियुक्तः 'नूनना काचिन् कथा ते कथनीयाऽस्ति। तन् प्रातरेवागम्यताम्' इति। स तथेति प्रस्थित इदानीमपि न न्यवर्तत। तन् प्रतिपालये प्रियवयस्यागमनम्। (क्षणं स्थित्वा पुरो विलोक्य) अये, अयमायाति वयस्यः।

सन्तांसस्मस्तभूपो भुकुलिननयनस्पष्टदृष्टाधरोष्ठः
स्विन्नस्वच्छाङ्गयष्टिः कुचभरयुगलीविवितोरःकवाटः।
आरक्तोऽभं नखाग्रैरशिशुशशधरवज्ञानि कण्ठे च तस्मात्
काचिन् कामास्त्रनिर्यच्चिशखिनि शलभिताऽनेन नूनं निवृत्ता ॥२१॥

* स्वार्थे णिच्।

† कैरलेषु प्रदेशे सार्त्ताण्ड इत्येव प्रयुज्यते।

स्वागतं प्रियवयस्यस्य। किं ब्रवीषि—'अपि मे जातः कालविलम्बः' इति। नातीव। कस्ते विलम्बहेतुः। किं ब्रवीषि—'सर्वं सविस्तरं वक्ष्यामि। प्रथमं कथ्यतां सा नूतना कथा। श्रोत्रं मां त्वरयति' इति। तेन हि श्रूयताम्। किं ब्रवीषि—'अवहितोऽस्मि' इति। अस्ति सारसिका नाम।

जाता पुरारातिपुरोपकण्ठे काचिन्मृगाक्षी कमनीयगात्री।
लावण्यसारव्ययनिर्ममेण विनिर्मिता किं नु चतुर्मुखेण ॥२२॥
तां वर्धमानां तरुणेन्दुवक्त्रां कन्दर्पेण तारुण्यमशिश्रियद्यत्।
*तत्सर्वलोकंजयमेकमस्त्रं बभूव चूतांकुरसायकस्य ॥२३॥
स मन्दहासस्य कटाक्षपातो वाणी सुधासारजिदप्यमुष्याः।
जन्मान्तरोपार्जितपुण्ययोगात् पुण्यात्मभिः कैश्चिदलम्भि पुंभिः ॥२४॥
घनोपमा तद्घनकेशदामा मनांसि पुंसां हि निबन्धुकामा।
भाति त्रिलोकीजयशंसिनीव सितेतरा स्वान्तभुवः पताका ॥२५॥
बालेन्दुवक्त्रे निटिलाख्यचापे सीमन्तरेखात्मकमेकमस्त्रम्।
सन्धाय सर्वां दिशमद्य जेतुं सन्नद्धते सारसनायकोऽद्य ॥२६॥
केचिन्मनोजं मदनं वदन्ति मीनोद्भवं केऽपि मुकुन्दसूनुम्।
प्रामादिकं तत्सकलं न सत्यमनङ्गनामा तदपाङ्गजन्मा ॥२७॥
रागेण बिम्बाख्यफलं यतोऽभून्माधुर्यसारेण सुधास्वरश्च।
नवप्रवालोऽप्यधरो स्मदिम्ना तं हन्त तस्या अधरं वदन्ति ॥२८॥[1]
विभज्य संयुज्य कलास्वकीया निमज्ज्य चोन्मज्ज्य च वारिराशौ।
सदाऽपि चन्द्रो यतमानमेवं कदाऽपि तस्या मुखसाम्यमेति ॥२९॥
स चाननिद्दस्वकृशः कृशाङ्ग्याः कण्ठप्रदेशोऽपि तथा विभाति।
यथा यदाश्लेषपरानभिज्ञान् स्वान् बाहुदण्डांस्तरुणा निनिन्दुः ॥३०॥

---

[1] संज्ञायां "भृञ्जि—" [पा० ३।२।४६] इति सर्वेण संज्ञायामेव कर्मणि सुपि च जयतेः खचो विधानात् सर्वलोकञ्जयमिति पदं चिन्त्यम्।

तथाच नैषधे श्रीहर्षः—

अधरं किल विम्बनामकं फलमस्मादिति भव्यमन्वयम्।
लभतेऽधरबिम्बसिल्यदः पदमस्या रदनच्छदं वदत ॥

तस्या भुजेनैकतरेण जय्यो मृणालनालो जलदुर्गसंस्थः ।
तथा महाकाननदुर्गसंस्थो नवशिरीषप्रसवः परेण ॥३१॥
यद्यत् त्रिलोक्यामुपमानभूतं तत्तद् व्यतीत्याद्य कुचौ तदीयौ ।
कमप्यदृष्ट्वात्मसमानमन्यमन्योन्यमुत्पीडयतः प्रकामम् ॥३२॥
हे हेमकुम्भाभिनुतौ कुचौ वां परस्परं मा कलहो वृथा स्यात् ।
इतीव माध्यस्थ्यमगान्मृगाक्ष्या घनाञ्जनाभा नवरोमरेखा ॥३३॥
सुमध्यमायास्सुकुमार—

(इत्यर्धमुक्त्वा) किं ब्रवीषि—'किमप्रसिद्धवद् वदसि तां मम। मत्त इति मा गणय। न चाहं तस्याः कान्तिसंपत्तिं त्वद्वचनामृताभिषिक्तां पूर्वाधिकश्रीकां नाभिलषामि। नूतना कथा मां त्वरयति' इति। किं तथा। किं ब्रवीषि—'अथ किम्' इति। सा कदाचित् पुरारातिपुरोत्सव-दर्शनोत्सुका

शाणोल्लीढशशाङ्कबिम्बवदना शातोदरीमञ्जरी
नांचूलीदलगर्भगण्डविलसन्नम्बेदांशुचेनोहरा ।
अर्धालक्ष्यपयोधरावृतननुस्स्वैरं सखीभिर्वृता
मन्दं मन्दमुपेत्य कुञ्जरगतिः पर्यष्करोद्देहिकाम् ॥३४॥

किं ब्रवीषि—'ततस्ततः' इति। ततश्च

सुविमलेषु मनस्सु विलासिनां
बहुषु नैकतया प्रविविम्बिना ।
मुकुरपञ्जरमध्यगतेव सा
कतिपये समये शुशुभेतराम् ॥३५॥

अनन्तरं सा सकलजनहृदयहरणविहितविश्रमयाऽपि वपुषस्सुषमया सख्युस्मरकेतोरन्तरङ्गं विशेषतो मुमोष। स खल्विदानीम्—

चन्द्रं निन्दति चन्दनं न सहते मन्दानिलाद्वेपते
कुन्दामोदमपाकरोति मधुपां संशीर्यते झंकृतैः ।
शूलारोहणमित्यवैति निनरामारामवासं नय-
त्येवं केसरमञ्जरीभवदशेषाशान्तरान वासरान ॥३६॥

किं त्रवीषि—'कथमियमवस्था ते श्रवणपथमवतीर्णा' इति। तस्यैव मुखतस्सत्यकेतोः। किं त्रवीषि—'कथं तत्र प्रसङ्गो जातः' इति। इमां दशां किंचिदवगत्य चरितं यथावदवजिगमिषुणा मया रहसि निर्बन्धपृष्टस्सर्वं स्पष्टं समाचष्ट। किं त्रवीषि—'किं त्वया प्रत्युक्तम्' इति।

सिद्धसाध्यं करिष्ये त्वामुत्तरेऽहन्यहं न चेत्।
कार्तान्त्यां दिशि मार्त्ताण्ड उदेष्यति न संशयः ॥३७॥

किं मम पृष्ठे ताडयन् त्रवीषि—'निपुणोऽसि' इति। मा मैवम्। त्वामेव परं सखायं मत्वा मयैवं प्रतिश्रुतम्। किं त्रवीषि—'त्वमेव तस्यास्सदनं याहि। अहं तु तस्याः कमितारं कोपिनं कुलिशाभिधानं कपटचाटुभिरन्यत्राऽऽकल्प्ये'* इति। अद्य तेन हि गम्यतामचिरेण। स्वस्त्यस्तु। शिवस्तेऽस्तु पन्थाः। (परिक्रम्य सानन्दमवलोक्य) इमां वेशवीथीं यावदवतरामि। (अवतीर्यावलोक्य) इदं तत्सारसिकासदनम्। अत्र वर्तत इदानीम्,

सारसिका सा रसिका सारसिकामोदसारभारवहा।
सादरमुचिता मरुता निद्राशेषार्धमीलिताक्षियुगा ॥३८॥

(पुनर्विलोक्य) अत्र कोऽयमध्यलिन्दमन्यतोमुखमास्ते। भवतु यथा दर्शयेयास्मि। (उच्चैः) कोऽत्र (इत्यर्धोक्ते भयेन विरम्य) स एवायं सख्या निर्दिष्टस्सारसिकारमणः कुपित इव लक्ष्यते। तथाहि,

आताम्राधररागदंनेत्रनिटिलश्वक्रायितभ्रूलतो
निश्वासानिलवेपमानमलिनीभूतोत्तरीयांशुकः।
बाहादण्डलसत्करालकरवालोत्कंपदृश्यानल-
ज्वालाभीषण एष वीक्षन इतो रूक्षेण चक्षुषा ॥३९॥

तदस्य गमनानन्तरमेवोपसर्पामि (निष्पृत्य विचिन्त्य) किन्तु खल्वस्येदानीं कोपकारणम्। (पुनस्सशिरःकम्पम्) भवतु ज्ञानम्। अस्यैव गृहिण्या कोपानलोत्पत्तौ अरण्या भवितव्यम्। यथा

*'आक्रल्प्ये" इत्यताऽऽत्मनेपदं चिन्त्यम्।

अवगत्य परत्र लालसामयमेनामरुणाननो भवेत् ।
दिनभामहिलोकगामिनीमयमाकाश इव क्षपामुखे ॥४०॥

(पुनर्विचिन्त्य) स पुनस्सत्यकेतुरित्येव भवितव्यम् । कुतः,

पद्मेक्षणा पद्मवर्णा पद्मगन्धिश्च याऽबला ।
आत्मार्थिनं सा पुरुषमिच्छत्येव न चापरम् ॥
पुमानीदृश एवैनां नूनमिच्छति नापराम् ॥४१॥

इत्यादिवचनादनयोरेतल्लक्षणलक्ष्यत्वाच्च । (पुनर्विलोक्य) अयमुत्थितः ।

कंपयन् पृथिवीं कृत्स्नां पदक्षेपभरानताम् ।
निर्जाय निलयायैव प्रस्थितो मृगराजवत् ॥४२॥

यावदुपसर्पामि । (उपसृत्य) अयि, सारसायतनयने सारसिके (अन्तः-पुरप्रवेशं निरूप्य सविषादमात्मगतम्) किमियमधोमुखी तिष्ठति । न शृणोतीव मे चाटुवचनम् । (अयि सारसेति पुनः पठति । पुनरपि न शृणोति, सहस्तनालं तदेव पठति, सविषादं स्वगतम्) अहो अस्या मदनावेशः । (पुनस्सस्मन्योपम्) अथवा फलितमस्मद्व्यवसितम् । भवतु । प्रबोधयेऽ* । (हस्तेन चालयन् । प्रकाशम्) अयि सारसायतनयने सारसिके

जागर्षि वा स्वपिषि गच्छसि वा प्रयासि†
किन्नासि किन्त्वसि नु सुख्यसि दुःख्यसि त्वम् ।
को देश एष कतमः कमलाक्षि काल
इत्यादि वेत्सि किमु सुन्दरि धिग् दशां ते ॥४३॥

किं ससंभ्रममुत्तिष्ठसि । किं ब्रवीषि—'भृत्यनामबुद्धिपूर्वकमेतदशेषम्' इति । मा मैवम् । समयोरन्यनर इतरं प्रति नैवं वक्तुमधिकारी । नाप्युत्थातुम् । तस्मादास्यतामास्यताम् । किं ब्रवीषि—'किमावां समौ' इति । नहि नहि भ्रमादेव निगदितमिदम् ।

* "बुधयुधनशजनेङ्प्रुस्भ्यो णेः" [पा० ३।३।८६] इति सूत्रेण णाव परस्मैपदेन भवितव्यम् ।

† तिष्ठसीति भाव्यम् ।

आलोललोचनविलासकलाविलोलि-
ताशेषलोकहृदयाः क्व कृशाङ्गि यूयम् ।
तत्तद्विकासशिथिलीकृतधैर्यबन्धा-
स्त्वादृक्षु चातकवदाकलिता वयं क्व ॥४४॥

किं ब्रवीषि—'वाग्मिनां पुरः किमपि न वक्तव्यं संवृत्तम्' इति । तथाऽपि त्वया सह संभाषणलालसं मे मानसम् । किं ब्रवीषि—'लिप्यन्तु नाम चाटुवचनानि । उपविश्यतामस्मिन्नवीने शयनपुटे । उपहृतान्यमूनि तांबूलदलादीन्युररी-क्रियन्तामत्रभवता' इति । (तथेत्युपविश्य तांबूलचर्वणादिकमभिनीय) किं ब्रवीषि—'कस्तावत्तवेदानीमागमनहेतुः' इति ।

मादृशो मृगशावाक्षि त्वादृशां निकटं सदा ।
प्राप्नुवन्ति यतो हेतोस्तत एवाहमागतः ॥४५॥

किं ब्रवीषि—'अलममूभिर्वक्रोक्तिभिः । अपकपटं कथय' इति । नन्वहमपि किंचिन् प्रष्टुकामोऽस्मि । किं ब्रवीषि—'मत्प्रश्नप्रतिवचनप्रदानानन्तरं सर्वं पृच्छ' इति । नहि नहि । अहं प्रथमम् । किं ब्रवीषि—'तर्हि तथा' इति । श्रूयताम्—

अयि भवति सन्नतभ्रूरभिभवतीयं बलीयसी चिन्ता ।
अपि च त्वत्प्राणसमः कुपित इवाऽऽलोकि को हेतुः ॥४६॥

किं पुनरपि विषादं न मुञ्चसि । सर्वमवगतमनेनेति चेन्मा भैषीः । वपु-षैव नन्वावयोर्द्वैधभावः * । (स्वगतम्) अहो नु खलु द्रढीयानस्यास्तद्गतो रागबन्धः । या ह्येवं निर्वेद्वाऽपि न वक्तुमारभते । (अन्यतो विलोक्य साध्वासम्) अये, इयमायास्या वयस्या नवचन्द्रिका । काममसूया: सुखत-स्सर्वमवगतदेश्यमप्यवगमिष्ये† । (प्रकाशम्) अयि, रसिकजननयनचकोर-चन्द्रिके नवचन्द्रिके क इदानीं दृश्यते देशः । किं केवलं हासं कुरुषे । किं ब्रवीषि—

* अत्र समागमयिष्यः ।

† ''अवगमिष्यामि'' इति पठनीयम् ।

'पीयूषस्रवसंमितानि वचनान्येतानि युष्मादृशां
यावद्यौवतमेव धीर निपतन्त्यस्मासु कोऽयं क्रमः ।

इति विचिन्त्यैव हसितम्' इति । को भेदः,

युष्माकं चलनीलनीरजरुचां बाले विलासो दृशा-
मित्थं सन्नतगात्रि चित्तहरणात् पश्चात् कियत्तिष्ठति ॥४७॥

अलमनावश्यकव्यवहारैः । प्रश्नोत्तरं वद । किं ब्रवीषि—'शृणोत्वार्यः । अस्याः खलु वयस्यायाः कृतेऽहमत्रभवन्तं दिदृक्षुः प्रस्थिता पश्चात् पथिमध्ये चित्रसेन-मुखादत्रैवाऽऽगतं भवन्तमश्रौषम्' इति । (सहर्षमात्मगतम्) अवगतमेवास्या दर्शनप्रयोजनम् । तथाऽप्यजानन्निव पृच्छामि । (प्रकाशम्) अथात्रभवत्या अस्मद्दिदृक्षा किंप्रयोजनिका । किं ब्रवीषि—'यतो हेतोरत्रागमनमत्रभवतः' इति । (स्वगतम्) मन्ये विदितमनया सकलं चित्रसेनमुखादिति । (उभे विलोक्य सहर्षानिशयम्)

अस्मभ्यमव्याहतवाहुवीर्यो भ्रुवं प्रसन्नो भगवाननङ्गः ।
अनन्यसाहाय्यवलोपलभ्यं कार्यं करस्थं यदभूद् गरीयः ॥४८॥

(सूर्यं पश्यन् किंचिदिव त्वरां निरूप्य) अहो विचारिणां वेलामतिक्रामति समयः । तथाहि

तरुणतामिमे सरसिजाकरा अरुणिमानमप्यरुणसारथिः ।
जहति केकिनो विहरणोत्सवं वहति नो मही तुहिनशीकरान् ॥४९॥

तदधुना प्रस्थिता वयं भवतीभ्यामनुमोदितव्याः । किं ब्रवीषि—'पुनर्दर्शना-वसरानुदेशनाद्यानुज्ञायेयम' इति । श्रूयताम्,

प्रथमसमागमसमुचितभूषणवपुषा सहितस्मुहृदा ।
नलिनी स्म यदा नयनं रमयेन्नयनपथं यामुदयेय तदा ॥५०॥

(प्रस्थितः) नवचन्द्रके, किं ब्रवीषि—'निभृतं किमप्युच्यते कान्तोऽस्याः कोपस्येव सन्निवेशविशेषस्तस्मान् काऽपि चिन्ता मेमनि' इति । (सस्मितम्) मा मैषीः । किं न श्रुतं 'नमेव वञ्चयितुं गतश्चित्रसेनः' इति । किं ब्रवीषि—

अधुनाऽस्मि गृहीतशल्या संवृत्ता' इति । अथ किम् । साधयाम्यहम् । (सानन्दं परिक्रामन्नात्मावस्थां विमृशति)

निर्भरपरस्परागमुद्रितयोर्मेलनाय नववयसोः ।
उद्भूत एव सद्याऽहं बद्धामोदं नयामि नाम दिवसान् ॥ ५१ ॥

अपि च,

सुभगानप्यनुभोगान् मध्ये मध्ये यथेष्टमाकलयन् ।
जलजदललोचनानां परमेष्ठी भद्रसेन इति गदितः ॥५२॥

कस्य पुनरन्यस्येदृशी सुखवृत्तिः ।

तपन्ति ये वर्ष्म तपोभिरुत्कटैर्मनिश्च शास्त्रार्थविचारणादिभिः ।
तेषामनाघ्रातमनोज्ञतेजसां(१) कालान्तरेऽल्पं सुखमस्ति वा न वा ॥५३॥

(निमित्तं सूचयन्)

स्पन्दते नयनं वामं करो वामेतरोऽपि मे ।
फलप्राप्तिः कथं नु स्यात् परस्परविरुद्धयोः ॥५४॥

परस्परप्रतिषेधादुभयमपि न स्यादिति वा विप्रतिषेधे परं कार्यमिति* वा भवतु । (पार्श्वयोरालोक्य) अये ! अतीतमिव चन्दनलतायाः मन्दिरम् । (तिष्ठन्ति-चिन्त्य) नाहमेतावदन्तिकागत एनामसंभाव्य गच्छामि । (निवृत्य) इदं तन्निलयनम् । यावत् प्रविशामि । (प्रविश्य सविषादम्) किमियं मामालोक्य कुपितेव वैमुख्यमाचरति । तथाहि,

स्थलकमलदलश्रीमोषिणा पादेन
क्षितिमिह विलिखन्ती सुष्ठु सन्तिष्ठमाना ।
मलिननयनलक्ष्यं मानमालंबमाना
मदयति मदिराक्षी मानसं मामकीनम् ॥५५॥

(१) कालान्तरे निर्वृतिरस्ति वा न वा इति पाठान्तरम् ।

* विप्रतिषेधे परं कार्यम् इति भगवतः पाणिनेः परिभाषासूत्रम् [१।४।२]। तथाचोक्तः श्लोकः—

निजपतिराद्यः प्रणयी हरिर्द्वितीयः करोमि किं गोपि ।
शृणु सखि पाणिनिरेव विप्रतिषेधे परं कार्यम् ॥

भवतु प्रसादयितुं प्रयतिष्ये। (उपसृत्य) आर्ये चन्दनलते मा मा मानम्-
मनुष्ठेयम्।

अपधीरयतीदमंग मामरुणिम्नाऽऽकुलितं मुखाम्बुजम्।
अपराचलशृङ्गसङ्गिनस्तुहिनांशोरनुकार्यतां गतम् ॥५६॥

अपि च,

भ्रमरो मम लोचनात्मकः स्मितशोभा-मकरन्दलालसः।
भ्रमतेऽधिकमप्रसन्नतामवलोक्याऽऽननपंकजे तव ॥५७॥
करुणां कुरु मय्यहेतुना कलहेनैष भृशं विशीर्यते।
अथवा वद कारणं प्रिये सदृशीं तस्य करोमि निष्कृतिम् ॥५८॥
अरुणाधर एष वेपते हरिणापांगि यथा यथा तव।
अपि मे हृदये तथा तथाऽङ्कुरतेः कोऽपि विषादवेपथुः ॥५९॥

(स्वगतम्) अहो नास्याः कोपस्य कोऽपि लघिमा लक्ष्यते। किं पुनः करवाणि। भवतु। प्रणमामि। प्रणतिप्रसाद्यस्तरुणीजनो नाम। (बद्धाञ्जलिः प्रकाशम्)

अयमञ्जलिरङ्गनामणे चरमस्स्याद् यदि न प्रसीदसि।
अपराधमबुद्धिपूर्वकं प्रवदन्ति प्रणतिप्रतिक्रियम् ॥६०॥

(दण्डवत् पतितुमिच्छति। पुनस्सरोमाञ्चम्)

गृहीतपाणिरनया यमानन्दमहं लभे।
तं वेदवेदान्तविदो न विन्दन्ते न संशयः ॥६१॥

(मुखमालोक्य सस्पृहं स्वगतम्) अस्याः खलु प्रशान्तकल्पकोपायाः,

रक्तारक्तेक्षणांभोजं स्फुरितास्फुरितेक्षणम्।
मुखं पूर्वाधिकश्रीकमिदं हरति मे धृतिम् ॥६२॥

मानशब्दस्य क्वचिदिहेऽपि क्वचित् प्रयोग उपलभ्यते।

अवाऽऽत्मनेपदं चिन्त्यम्।

अवाच्यात्मनेपदं चिन्त्यम्। अदृशब्दात् क्विपि नियतस्य धातोः परस्मैपदस्यैवोचितत्वात्।

तदागामिनीं यामिनीमनया सफलीचिकीर्षामि। (प्रकाशम्) किं ब्रवीषि—'भवन्तमेवाऽऽगन्तुकमालोक्य सादरमभिमुखीभवन्तीमिमामनादृत्य यद्गतोऽसि, ततो मय्यविवेकेनन्धनो दुर्वहगर्वगन्धवहैकबन्धुः कोऽपि कोपानल उदजरीजृंभिष्ट। तस्येदानीमार्यवचनामृतरसमुक्षितस्य नामापि न श्रूयते इति संवृत्तम्' इति। (सस्मितम्। स्वगतम्) को न्विदानीमत्र न लीयते। (प्रकाशम्) अयं हि युष्मादृशां संप्रदायः। (स्वगतम्) कथमस्या आकूतमवगन्तव्यम्। भवतु वक्ष्यामि सूचकाक्षरम्। किं भविष्यति, (परिसरवर्तिनीं पद्मिनीमवलोक्य विवर्त्य प्रकाशम्) आर्ये, पश्य,

अधिष्ठितां हंसवरेण पद्मिनीं न सन्निधत्ते भ्रमरो विशंकितः।

किं ब्रवीषि—

'विवञ्चयित्वेनमसूक्ष्मदर्शिनं सुखेन भुञ्जीत वृथैव शंकते' ॥६३॥

इति। (हर्षातिशयमभिनीय, सस्मितं पुनस्तत्रैव भ्रमरपटलीमङ्गुल्या निर्दिश्य) आर्ये, भ्रमरपटलस्यास्य पश्य मदतां विचिकित्साम्। यथा,

मन्दीकृतमकरन्दं विकसदिदं किमु पिबामि कमलवनम्।
किमुन विकसिष्यमाणां* नवमधुरां कुमुदिनीं प्रतीक्षिष्ये ॥६४॥

इति। (सहासम्) किं ब्रवीषि—अकाण्डे विचिकित्सतो मुग्धानमून् भ्रमरकानहमुपदिशामि। हे भ्रमर,

विजहिहि विगतमरन्दान्यब्जान्यथ भजस्व कुमुदवनम्।
कालातिपात एको विघ्नस्ते किन्न सोढव्यः ॥६५॥

इति। (स्वस्य गमनस्य कालातिपातं नाटयन् प्रस्थितः। साभिगानन्दविश्वासबहुमानोत्सुक्यस्मितम्) अचिरेण पुनरावयोर्दर्शनं भूयात्। किं ब्रवीषि—'तावत्समयं स्मरणीया वयम्' इति। किन्तावदिति। आजीवनान्तं स्मरिष्यामि। अद्य खलु त्वां विना विद्यन्त एव सुलभास्सुहृच्छिरोरत्नानि त्रिलोक्यां मे न। (नेपथ्ये)

भो भोः काञ्चनोष्णीष! क्षणं तिष्ठ।

---

* विकसिष्यन्तीम् इति साध्।

विटः—किमिदमस्या अनुचारिणो मामाह्वयन्तीव। (विमृश्य) बहवः काञ्च-नोष्णीषाः। मया कस्संबन्धः। (इति गच्छति)

(नैपथ्ये)

आ अस्माभिराहूतोऽपि अनाकर्णितकेन कत्र यास्यति। अथवा बधिरोऽसि।

विटः—इदं मां प्रति न भवेत्। अदृष्टश्रुतपूर्वाय कः कुप्यति। (पुनरपि गच्छति)

(नैपथ्ये)

इतो विलोकनमात्रं किं न दास्यसि।

विटः—भवत्ववलोकये। तेन को दोषः। (तथा कुरुते)

(नैपथ्ये)

कुण्डिनग्रामं प्रति कथं पन्थाः।

विटः—हुम् (इति विहस्य) अहो मा कुप्यत। सम्यगवबोधयामि।

(नैपथ्ये)

कुत्र जिह्वा ?

विटः—विजहिन कोपमवहिताः शृणुत।

गत्वा किंचन दक्षिणां दिशमितो निष्कण्टकेऽयं यथा
द्रष्टव्यं द्रमिडाभिधस्य धनिकस्योच्छ्रंगमट्टालकम्।
पश्चात् पश्चिमतः पुरीं नरपतेः पश्येत हृश्यश्रियं
यत्राऽऽस्ते खलु सैष कुण्डिनपतिस्स्वर्गे सुरेन्द्रो यथा ॥६६॥

(नैपथ्ये)

अहो अस्य दुर्वहो गर्वः, योऽयं मार्गक्षमानुदेशेऽपि भङ्गिमन्विच्छति।

विटः—किमसूयया। यूयमपि भङ्ग्या वदत।

(नैपथ्ये)

*पलायन्तु पलायन्तु वृषल्यः (किलिकिलिशब्दश्च।)

* पलायन्तां पलायन्ताम् इति पठितव्यम्।

विटः—(आश्वासं नाटयन्) गतोऽयं सानुचरो द्विजवरः। वयमपि प्रकृतमनुसरामः। (परिक्रम्यावलोक्य) इयं सा नारायणी नाम। निजपुरोपरिसरे प्रियसखीपरिवृता सावशेषलज्जा कन्दुकलीलालालसा दृश्यतरशरीरसुषमा दृश्यते।

तथाहि,

आनम्राश्चिनकाञ्चनद्युनिमुषा निर्व्याजकान्त्या स्वयं
स्रंसत्कुन्तलभारसंकलितया साकं भ्रमन्ती मुहुः।
मध्येनीलबलाहकं विकुटतो विद्युल्लतातेजसः
कुर्वाणा विपरीततामिव विभात्येषा कुरंगेक्षणा ॥६७॥

अपि च,

घर्माभःकणिकांकुरद्विगुणितान् हारानुरोजन्मनः*
अर्द्धस्रस्तकरोपरुद्धवसनं धत्ते निनंवं गुरुम्।
पातोत्पातविधायिकन्दुकमनु व्यापारिते लोचने
बिभ्राणा कलयत्यसौ मम मनो नो कन्दुकं सुन्दरी ॥६८॥

यावदुपसर्पामि। (उपसृत्य)

लीलां लोचनमुग्धदामङ्गानीमानि सादितानि च ते।
पश्यन् विरमेति वचो वक्तुमवक्तुं च न शक्नोमि ॥६९॥

तथापि,

विरम विशालाक्षि पुनः क्लान्तिस्त्याल्लीलया न जानीषे।
तान्तां तान्तव तावत्तनुलतिकामुपहराक्षणोर्मे ॥७०॥

(निजश्रवणमङ्गुल्या स्पृशन्)

अयमेवं नाथते† मधुकरः
श्च्योतमानं सरसिजादानघ्रादनिलाहतेः।
परागपालीशबलं मधु पायय मा चिरम् ॥७१॥

* अत्र विसर्गसन्धिः स्फुट एव।
† अवाप्यात्मनेपदं चिन्त्यम्।

(स्वगतम्) नेयं प्रतिवक्तुमारभते। केवलं व्रीडावकुण्ठितवदनारविन्द-मवतिष्ठते। (विचिन्त्य) एवं भवतु। (प्रत्यक्षमितरां प्रति) किमियमवदना तिष्ठति। किं ब्रवीषि—'किन्न जानासि कैशोर एव सविशेषहीकामत्रभवतीम्' इति। कामं जानीमहे। किं तु नेयं कैशोरसुलभा लज्जा। कुतः,

विलिखत्यवनीतलं पदा स्थलपंकेरुहदीप्तिदस्युना।
पुलकांकुरिताङ्गवल्लरी स्मयमाना निभृतं नतानना ॥७२॥

(नेपथ्ये)

आर्ये चन्दनलतिके कुत्राऽऽस्ते भद्रसेनः। किं ब्रवीषि—इत इदानीमेव निर्गत इति।

विटः—(आकर्ण्यौच्चैः) अयमयमहाम्मि।

(नेपथ्ये)

आगम्यतामागम्यताम्।

विटः—आर्ये कार्यगौरवात् प्रस्थितोऽस्मि। किं ब्रवीषि—'अचिरादनन्तरं दर्शनं भूयादियतः किमन्यत् प्रार्थनीयमस्माभिः' इति। अथ किम्। नारायणि त्वमपि,

यद्यक्षमाऽसि वाक्येन रुध्यमानेन लज्जया।
अपांगेन मृगापांगि पाथेयं प्रतिपादय ॥७३॥

(परिक्रम्य सहर्षम्) अयमयमायाति सहस्तालं प्रहसंश्चित्रसेनः। (सह-सोपसृत्य) त्वरयति मां ते मुखोद्योगः। तत् सर्वं सविस्तरं कथय। किं ब्रवीषि—'एवं करोमि किं तु प्रच्छायशीतलं वटविटपिमण्डपमाश्रित्य सुखा-सीनौ भवावः' इति। (तथा कृत्वा) किं ब्रवीषि—'शृणोतु वयस्यः' इति। अवहितोऽस्मि। कथ्यतामामूलचूडम्। किं ब्रवीषि—'यावदहं भवन्तमामन्त्र्य वञ्चनोपायं चिन्तयन् प्रस्थितोऽस्मि तावदक्षिमुखमागता नवचन्द्रिका। तदेव मङ्गलसूचकमिति समाश्वस्तं हृदयम्' इति। विदितमेतत्। ततस्ततः। किं ब्रवीषि—'ततश्च सा निजनामधेयार्थानुरूपं मन्दस्मितपूर्वकं सारसिका-समवस्थां मे निवेदितवती' इति। ततस्ततः। किं ब्रवीषि—'अनन्तरं

सन्तोषतरंगितान्तरंगतो मत्तस्त्वद्वधापारस्तद्विषय एवेत्यवगत्य निर्वृतहृदया निवृत्ता तत्रभवती' इति। एतावत्पर्यन्तमवगतमस्माकम्। अनन्तरकथाया-मावेगः। किं त्रवीषि—'कथं विदितम्' इति। वक्ष्यामि। इदानीं प्रसङ्गभङ्गो मा भूत्। ततस्ततः। किं त्रवीषि—'ततश्च तस्यानिष्टकुलाचलपत्रपाटन-कुशलतया कुलिशस्य कुलिशस्य निलयनमधिगतेन मया,

कोपाङ्गारोद्गिरण*निरतैर्निश्चलैर्दृष्टिकोणैः
प्लुष्टप्रायं स किल कलयन् पार्श्वसंस्थं समस्तम्।
धुंधुर्व्वानैश्चरणहतिभिश्चालयन् सालशैलान्
साक्षाद्दृष्टस्त्वपुरनिकटे सञ्चरन् प्राक्प्रतीचम् ॥७४॥

अपि च,

नैसर्गिकाभिनवताम्रसमानरुच्चि प्रोत्कंपितानि पुनरुत्कटरोषवेगात्।
श्मश्रूणि तान्यसकृदूर्ध्वमुखाकृतीनि कुर्वन् त्सरुग्रहकिणस्थपुटेन दोष्णा॥

अहं तु नवचन्द्रिकामुखादवगतावस्थः परिजननिवारितोऽपि प्राह्णादीं वृत्ति-मनुतिष्ठन्नेवमवादिषम्' इति। किं तत्। किं त्रवीषि—

'भो भोः शौर्यसरित्पते मृगयया पर्युत्सुके निश्चलं
पश्यत्यद्य भवत्यदन्ति मनुजाञ्छार्दूलहेला इति।
त्वामुद्दिश्य वदन्ति सर्व इति यत्तत्त्वं न वा तत्त्वतो-
जानासीत्युदितं गुणाय भवते दोषोऽस्तु मा मां प्रति' ॥७६॥

इति। ततस्ततः। किं त्रवीषि—

'ततस्तैलोल्लासी ज्वलन इव कीलालशकलैः
सकोपो वात्याभिर्दवदहनवह्वा प्रववृधे।
अतः पश्चाद् भूतामहह तदवस्थामयि सखे
फणीन्द्रो जिह्वानां द्विगुणितसहस्रेण गणयेत्' ॥७७॥

अनन्तरमयमन्तःपुरमधिगम्य परिगृहीतफलककृपाण एवांगणस्थलमवातरत्।

ठात्कारयन् फलकेनोरुमूले प्रभूत्योर्वै रेव षट्सप्तकृत्वः।
प्रातिष्ठते (?)महद्वे काननाय यावत्तावत् प्रोक्तमेतन्मया च ॥७८॥

* टु वम उद्गिरणे इति धात्वनुपाठे निपातनादस्य साधुत्वम्।

तदपि श्रूयताम्, इति। अथ किम्। किं ब्रवीषि—

'भो भोः शौर्यनिधे मृगयानैपुण्यशालिने भवते।
नैतन्निवेदितव्यं* तथाऽपि नियुनक्ति† मां सख्यम् ॥७६॥

तस्माद् विज्ञापयामि

यावन्मनुष्यजातेर्विरतिं प्राप्नोति मुखभवः शब्दः।
तावद् मन्दोत्थानाः श्रूयन्ते नाम दुष्टमृगाः ॥८०॥

इति' इति। (सहर्षम्) सखे सम्यगुपायो निर्मितः।

भवति भवादृशि सख्यौ भवति कथं मे प्रतिश्रुतेर्भंगः।
वसति वसुंदेवसुते सत्रा विजयस्य कुत्र न विजयः ॥८१॥

ततस्ततः। किं ब्रवीषि—'सोऽयं सशिरःकंपं मामेवमवादीत्—"सम्यगुपलक्षितमेवैतत्। अथाहं सकलजनेषु कुंभकर्णायमानेषु उत्थाय काननं प्रक्षोभयिष्ये। मम कण्डूतिशमनाय जगतां हिताय वा भवतु।

उभौ सहायौ यामिन्यां वनायोत्तस्थुषो मम।
धराधरोत्तरं धैर्यं करवालधरः करः ॥८२॥"

इत्यादिकमनेकमात्मन औन्नत्यमालपन्नन्तःपुरमगात्। अहमप्यात्तमोदमावृतोऽस्मि' इति। (हर्षातिशयं नाटयन) सर्वथाऽयोर्गृहीनशल्यता संवृत्ता। अथवा सारसिकामत्यकेत्वोः। नहि नहि कुसुमायुधस्य, उत विरिंचस्य। न खल्वेतदेतेष्वेकैकत्यन्मुलभं भवति। किं ब्रवीषि—'धूमज्योतिस्सलिलमरुतां सन्निपातः खलु मलिलवृष्टिं संपादयति' इति। अथ किम्। किं ब्रवीषि—'अथ कुत्र प्रस्थानव्यमस्माभिः' इति। (ऊर्ध्वमवलोक्योष्णबाधां रूपयन) क्षणमिहैव निवसामोऽमुष्मात् कठोरातपनिवारणनिपुणात् वटविटपिनिकटान्न मे चरणौ प्रसरतः। इदानीं हि,

* "निवेदयितव्यम्" इति साधु।

† 'स्वरयत्योषमरोहिति" वक्तव्यम् इति वार्तिकेनाऽऽत्मनेपदेन भाव्यम्।

मन्दाक्रान्तो गगनमकुटं कर्शितांगोऽपि विश्वं
भानुश्शाणोल्लिखितनिशितैर्भानुभिः पोषू पीनि ।
कोशापेतो द्विगुणितविषो जायते नन्वहीन्द्रः
सर्वेषां स्यात् प्रथिमनि सति स्वप्रतापस्य मूर्च्छा ॥८३॥

(दिशो विलोक्य)

जलाशयाः पश्य चतुर्षु दिक्ष्वपि ज्वलन्ति वेदान्तविदां प्रपञ्चवत् ।
मृगा न यद्वञ्चितकास्तृषार्दितास्त्यजन्ति साक्षान् सलिलेऽपि संशयम् ॥८४॥
किं त्रवीपि—'सम्यगुपलक्षितं वयस्येन। तथाह्यस्य शाखाशिखासु शाखिनः,

लक्ष्यन्ते पक्षिणोऽमी निजनिजदयितापक्षतिद्वन्द्वमञ्जन्-
कीटन्यक्कारचुञ्चवा विमलनरसरस्तोयमादाय चञ्चवा ।
आत्तानन्दं पिवन्तः प्रणयपरवशाः प्रेयसीपीतशेषं
किन्नाहो नन्दनीयं सरसिजधनुषस्सर्वसाधारणत्वम् ॥८५॥

(साश्चर्यम्)

दीनः खलध्वनीनः प्रतिभमुपगतस्सेवते यां सुखार्थी
सा छाया संकुचन्ती तरुवरनिकटं सादरं सेवमाना ।
तस्यास्ताम्रायताक्ष्या अपि वत कुलिशस्यापि वा सत्यकेतो-
रेषाऽवस्थेति साक्षादिव वदति सखे पश्य मध्याह्नलक्ष्मीः' ॥८६॥

इति। अहो अवसरज्ञता भगवतः पवमानस्य ।

तथाहि,

पुरा भ्रामं भ्रामं मलयशिखरिण्येष पवनः
पुनस्स्पर्शं स्पर्शं वनजवनमात्तान् परिमलान् ।
इदानीं तन्वीनामुपहरति संस्विन्नवपुषां
प्रतिद्रव्यं लिप्सुर्मुखपरिमलाख्यं दृढमिव ॥८७॥

अपि च

प्रत्यंगं प्रमृशन्नयं मृदुतरं प्रेम्णा परेणाऽऽकुलो
मा मा याहि सखे दिवाकरकराघातेन दैन्यं महत् ।
एवं सान्त्वयतीव मां शिशिरयन् शीताकरैश्शीकरै-
रापत्कालसुहृत् सुहृत् खलु सखे दुर्हृच्च संपत्सुहृत् ॥८८॥

(नेपथ्ये)

रत्नांगुलीयविलुठत्किरणानुविद्ध-रक्ताङ्गुलीविलसदग्रकराधिवर्ति ।
शुद्धौदनोपभरितं मणिभाजनं वां मध्याह्नभुक्तिविधये*नियुनक्त्यमुष्याः ॥८९॥

विटः (आकर्ण्य)— अये तत्रभवत्या बालपार्वत्या इव स्वरः । मन्ये सा खलु नौ विश्रान्तिभाजौ विलोक्य उपचितोपकरणा सविनयं भोजनायापेक्षते । आवाभ्यां तु सदृशानुरागतरुणजनसमागमसंचितोद्यमतया विस्मृता भोजनकथा । अथाऽस्या मनोरथमावयोरुदरं च पूरयावः । (निष्क्रान्तः)

(ततः प्रविशति सुप्रोत्थितो विटः)

विटः—(ससंभ्रमं स्वच्छायामुपक्रम्य) अहो नु खलु द्वादशपदीमतिक्रान्तस्समयः । मया पुनरियान् कालो लंघितो नावगतः ।

कुतः

मन्दमन्दचलदुल्लसद्वलयमञ्जरीमधुरशिञ्जितैः
स्पन्दमानमणितालवृन्तभवमन्दमारुतसुखावहैः ।
शारिकोदरसहोदरे शयनसंपुटे सुलभनिद्रया
शारिकामधुरभाषिणीमकुटमालयाऽस्मि विवशीकृतः ॥९०॥

इदानीं तु

शोभासारजिहीर्षुणा बलवता म्लानेन पंकेरुहा-
मयारुण्येन च वारुणीं दिशमिता ये केचिदंभोधराः ।
चक्राणां हृदयांबुजानि च मनागुत्कण्ठया चुंबिता-
न्येषा किं तु शनैश्शनैः कुमुदिनीहर्षं परं वर्षति ॥९१॥

* नियुङ्क्ते इति साध्।

मया तावत् सुप्तोत्थितेन सविधे संविष्टश्चित्रसेनो न दृष्टः। मन्ये प्रथमप्रबुद्धः स सुखसंविष्टं मामप्रबोध्य सारसिकासन्निधिं प्रति प्रस्थित इति। अहमपि तावत् सत्यकेतोस्समीपं प्रयास्यामि। (त्रिचतुरं परिक्रम्य) अये संप्राप्त एवास्मि सत्यकेतुसद्मनस्सविधम्। (अग्रतो विलोक्य) सोऽयं प्रियवयस्यः प्रियतमाविरहदहनदह्यमानदेहो दृश्यते। कष्टं भोः !

अजस्रसंप्रस्रवदस्रधारे कालोन्मिषत्केतकवर्हगौरे।
चित्रस्य चित्रत्कटकं कराब्जं कपोलकाण्डे लिखितो यथास्ते ॥९२॥

अपि च

शशभृदिव विभाते भानुना भग्नभानुः
शरदि विगलिनापो वारिवाहोऽपि यद्वत्।
गतदिवसविकासस्सूनपुञ्जो यथा वा
तदिदमपगताभं रूपमद्यापि रम्यम् ॥९३॥

(श्रवणमवधाय) किमपि किमप्ययमात्मना मन्त्रयते। तदहमवहितश्शृणवानि। (तथाऽवनिघ्नते)

(नेपथ्ये)

नस्यास्तामरसानुकारि वदनं तत्तादृशं वीक्षणं
सा चान्तर्गतमन्दहासमधुरा स्वच्छा कपोलस्थली।
ईषद्दर्शितमुग्धकुन्दमुकुलप्रस्पर्द्धिदन्तप्रभा-
संकीर्णाऽप्यधरश्च तिस्मुकृतिना केनानुबोभूय्यते ॥९४॥

विटः — अस्य हृदयमजस्रमनन्यपरायणम्। भवतु पुनरपि श्रोष्यामि।

(नेपथ्ये)

स्थिरो धीरः क्वाहं जलविमथनः क्वासौ च मदनः
सलीलालोलालोकितमनु पतेत्तन्मय्यनुपमम।
अयं कालो विद्याभ्यसनविहितो मे विशवयसः
क्व विद्या तद्वक्त्रे हृदि विलुठमाने* स्मेरसुभगे ॥९५॥

* विलोठमाने इति मा०।

आः

का कान्ती रुधिरास्थिमांसवसिकापूरे शरीराह्वये
सा सा निर्जिततप्तकाञ्चनशिखाकान्तिः कदा द्रक्ष्यते ।
हे चेतस्त्यज निन्द्यवस्तुषु रतिं किं नो नियन्ताऽस्ति ते
किं किं निन्द्यमिति स्वभावमधुरास्तत्तादृशा विभ्रमाः ॥६६॥

अहो मम महीयसी मन्दभाग्यता यथा मम भद्रसेनस्यापि भग्नप्रतिज्ञता संवृत्ता एवं मन्दभाग्यस्य किमनेनार्थजीवितेन ।

विटः—नायमवसरः कालहरणस्य यदयमतिनिष्ठुरमालपति । (उपसृत्योच्चैः) किं किं भद्रसेनस्य भग्नप्रतिप्रतिज्ञतेति ।

यदा सुमेरोश्चलनं पतनं वा विहायसः ।
भविता भद्रसेनस्य तदा भंगः प्रतिश्रुतेः ॥६७॥

तदलमधुना दुर्विपहेण विषादेन ।

जलधेरिव शिशिरकरो जलधरनिकरः शिखावलम्येव ।
जलजाकरस्य रविरिव जनोऽयमुदितः पुरो ननु ते ॥६८॥

(पाणिना पाणिं परिगृह्योत्थाप्य) उत्तिष्ठोत्तिष्ठ । किमधुना विषयाकुलत्वं न मुञ्चसि । किं न जानीषे परिणतो दिवसः ।

पश्यैष दूरपतितो जलधौ खरांशुः
स्वच्छायवञ्चितमृगेन्द्रसमानधर्मा ।
आनीमनन्यशरणां स्वकराभिमर्शै-
राश्वासयेन्न कुमुदिनीमचिरान्न सुधांशुः ॥६९॥

(सहर्षम्) किं ब्रवीषि—'पतनु पतङ्गः पयोराशौ । किमस्माभिः कर्तव्यम्' इति । श्रूयताम् । कर्तव्यानि ते पृथक् पृथङ्निर्दिशामि ।

अस्मत्प्रावकषायितं प्रथमतः प्रक्षालयेदं मुखं
पश्चादञ्जनपंकसंकलिततां संपादयाक्षोर्युगे ।
बाहू योजय कंकणैर्नवमने धत्स्वाप्यनर्घे उभे
अंगेष्वारचयानुलेपनममन्दामोदिभिर्बन्धुभिः ॥१००॥

किंच

मैरेयं मधु मानसोद्यमकरं पानीयमानन्दत-
स्तांबूलच्छदनं त्रयोदशगुणं संस्वादनीयं पुनः।
अन्यान्यप्युचितानि तानि कलयस्वानङ्गसंदीपना-
न्येतानि त्वयि पौनरुक्त्यमुररीकुर्वन्तु सर्वाण्यपि ॥१०१॥

किं ब्रवीषि—'कथमहममूनि हृदयविदारणैकपरायणानि कर्माण्यनुतिष्ठेयम्' इति। यदुक्तं भवता 'पुराऽपतिष्ट—' पूर्वश्लोकावधिरिति तद्वैपरीत्यमचिरादुपेष्यसि। किं ब्रवीषि 'कथम्' इति। अहो विदितमपि वस्तु तत्कथाशुश्रूषया किमविदन्निवाभिनयसे। एह्येहि समयोऽतिक्रामति। पन्थानमवगाह्य सविस्तरं वक्ष्यामि। (पाणिना पाणिं परिगृह्य परिक्रामन) श्रूयतामेतद्येन मन्ये श्रवणौ कृतार्थयसे। (अस्ति सारसिका नामेत्यादि पूर्वश्लोकद्वादशकपाठपूर्वकम्)

सुमध्यमायास्सुकुमारमस्या मध्यप्रदेशाहिनवासभूमि।
तवाधिरोढुं हृदयं तदीयं सोपानमाभाति वलित्रयाख्यम् ॥१०२॥
उभौ दधातामुपमानभावं तदीयनाभीमयपल्वलस्य।
अगाधतायामनुरागसिन्धुर्यस्त्वदृगतोऽस्यास्तव तद्गतश्च ॥१०३॥

(स्मितसम्) किं लज्जामुपक्रमसे।

सुवर्णवर्णौ मृदुलावनीव हस्तावुभौ कश्चन हस्तिराज्ञः।
नभस्तलस्थौ दधते यदि स्यात्तदा तदीयोरुनिनंवर्वरि ॥१०४॥
क्रमान् कृशे नातिकृशे सुवृत्ते नाय्यायते केचन यज्ञयष्टीः।
व्यधत्त तस्याः पदयोर्विधाता मारस्तयोर्मार्दवमप्यदत्त ॥१०५॥
आचार इत्यादृतयावकार्द्रे समञ्जु शिञ्जन्मणिनूपुराढ्ये*।
पदे तदीये सति मञ्जु कूजन्मधुव्रते कोकनदे क्व शोभा ॥१०६॥
वाणी सुधां हेपयतीव तस्या गाने किमाभिः परिवादिनीभिः।
औचित्यहीना भणति क्रिया वा तस्या हिमानीव दिनप्रभायाः ॥१०७॥

* तालैः शिञ्जदलयमर्भगैरिति कविकुलचूडामणिः प्रयोगमनुस्मरतैवमुपनिबद्धं कविना। वस्तुतस्तु शिञ्जदिति रूपं चिन्त्यम्।

किं बहुना,

"प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः" *।
इत्याद्युपाकर्ण्य वचः कवीनां विवृद्धमन्युर्विदधे विधिस्ताम् ॥१०८॥

अद्य खलु वयस्य,

तस्यां शोभासरस्यां पुलिननलसमुज्जायमानैकनाल-
स्फायत्कोशद्वयोद्यद्धरशिरसि निरूढामलांभोरुहिण्याम् ।
सान्द्रानन्दाभिधाने कचन जलनिधौ दूरनिर्मग्नपूर्वं
स्वात्मानं स्नापयिष्यन् परिलपसि कथं पानमाल्यानुलेपैः ॥१०९॥

किं ब्रवीषि—सखे, आवेगवेपथुना मे चरणविक्षेपा न स्थिरीभवन्ति। इदमप्यन्धनमसमत्युत्कटं वर्तते। तथाहि

सर्वं च निम्नोन्नतसालशैलशालाशिलामार्गमृगादिजालम् ।
एकाकृतीकारयितुं पटीयान् पश्यैष को नाम महेन्द्रजालीं ॥११०॥

सर्वथा गन्तुमनीशोऽस्मि संवृत्तः इति। दृढमवलंबस्व मेऽग्रहस्तम्। (कतिचित् पदानि गत्वा दिशो विलोक्य) किमपि शिथिलितोऽन्धकारबन्धः। (प्राचीं विलोक्य सविस्मयम्) अयमुदितभूयिष्ठ एव भगवानमृतदीधितिः। तथाहि,

देवानां मदिरायितः पशुपतेर्देवस्य चूडायितः
कोकानां क्रकचायितः कुमुदिनीदेव्याश्च जीवायितः ।
नाराणां नरुणायितस्तनुचकोरीणां च भाग्यायितो
दीपः कश्चन मार्गदर्शनविधौ मार्गेण ते दर्शितः ॥१११॥

भो महाजनाः

* कु.सं. ३।४६

† "स्फायन्निर्मलमल्यौ" इत्यादिप्रयोगदर्शनादनुदात्तेत्त्वलक्षणमात्मनेपदमानित्वमाश्रित्य कथञ्चित् समर्थनीयम्।

दीनां दीनामहिममहसः पादघातैः कठोरै-
र्भीतां भीतां तिमिरनिकरैर्निर्दयं ग्रस्यमानाम् ।
दिष्ट्या दृष्ट्वा परिणतदयो दिग्वधूटीं कराग्रै-
रादत्तेऽयं कथयत कथं युज्यतेऽस्मिन् कलंकः ॥११२॥

किं ब्रवीषि—'कियानितः पन्थाः' इति (सस्मितमङ्गुल्या निर्दिशन्) सखे पश्य पश्य, तुहिनरश्मिमिश्रणसंजातसविशेषदृश्यश्रीकश्शशधरोपलघटित-गवाक्षाभिन्नवीक्षणविगलदविरलाश्रुमिश्रितस्त्वद्विरहकातरां तत्रभवतीमनु-शोचन्निव सोयं प्रासादो यत्राऽऽस्ते तत्रभवती । या खलु,

चकोरिका चन्द्रमिव चातकीव बलाहकम् ।
चक्रवाकाङ्गनेवार्कं त्वामेव हृदि वीक्षते ॥११३॥

किं ब्रवीषि—'इयानपि मे योजनायते पन्थाः' इति ।

मनसा प्रेमपूरेण कटाक्षामृतमादिमम् ।
पायं पायं तदेवास्यास्सञ्चरद् द्रुतमेष्यसि ॥११४॥

(परिक्रम्य) पश्य, संप्राप्तावेवावां सारसिकासदनसन्निधिम् । (सावधानमालोक्यांगुल्या निर्दिशन्), भो वयस्य निपुणं निरूप्यताम् । यत्कृते त्वया यादृशी दशेयमनुभूयते सैव तव जीवितसर्वस्वायमाना तादृशी-मेव दशामनुवोभूयमाना नवचन्द्रिकाचित्रसेनाभ्यां कथं कथमपि समा-श्वास्यमाना कुसुमशयनमधिशयानाऽपि दुर्विषहविरहदहनदह्यमानाङ्गी दृश्यते । (सनिश्वासम्) किं ब्रवीषि—एवंपरा,

नयनमपिकामिश्रैर्बाष्पैर्मलीमसिताननां
श्वसितपवनाघातैः कोष्णैर्गतप्रभिताधरां ।
कृशकृशतनूरास्ते कामं तथाऽप्ययथापुरा
नयनसुखदा कान्तिर्यां काचन प्रविजृंभते ॥११५॥

(सरोमाञ्चम्)

अरुणसरसिजाभं कोमलं पाणिमेकं
विगलितवलयं चेदेवमेवातिरम्यम् ।
मम वपुषि विधास्यत्युद्गदुद्दामहर्षं
यदि किमपरमस्मात्साधु संसाधनीयम् ॥११६॥

इति । श्रूयन्तां चास्या भवद्विषयाणि परिदेवितानि ।

(नेपथ्ये)

भगवन् कुसुमधन्वन् बद्धाञ्जलिरियमियदभ्यर्थये ।
पुष्पेषून् क्षणसमयं च वर्षयस्व स्वात्मानं यमय निशीथिनं च काममम् ।
किंतु त्वं सकृदपि दर्शयस्व कान्तं नो चेन्मां विजहि किमद्य वैशसेन ॥११७॥
प्रेमार्द्रैश्चतुरगभीरमुग्धमन्दानानन्दं सततममन्दमादधानान ।
प्रत्येकं मयि पतितांश्च तान कटाक्षान पश्येयं सकृदपि विश्वसुन्दरस्य ॥११८॥

विटः—अहह सखे, आत्मानमेवोद्दिश्यानन्यशरणमालपन्तीमेनां कथमुपेक्षसे । किं त्रवीषि—

'प्रणयेन करुणया वा त्वरया कृपया कयाऽपि वा त्वरया ।
विभ्रान्तचित्तवृत्तिः कर्तव्यं किमिति नो जानें' ॥११९॥

एह्येहि अहं जानाम्येव । (हस्तं गृहीत्वाऽन्तःपुरं प्रवेश्य) पश्य सखि यन्निमित्तं रेखामात्रावशेषवपुरितापानि च वहसि सखा समागतस्सोऽयम् । चित्रसेनोत्तिष्ठोत्तिष्ठ । किं न स्मरसि सुमहान कोऽपि कार्यभारो वर्तते (चित्रसेनस्य पाणिं गृहीत्वा प्रस्थितः) कार्यभारान् त्वर्यते । किमस्यानन्तरं युवयोः प्रियमाचरणीयम् । सर्वमप्यत्र सुकरमवधार्यताम् । किमवचनेन वामवधीरयथ । नवचन्द्रिके, किं त्रवीषि—'इमौ वक्तुं न शक्नुतः' इति । अहमेव तावद् त्रवीमि ।

निवारितस्य कुलिशः शल्योऽप्यपहृतोऽनयोः ।
पुनरुक्तं भवेदद्य पुनर्यत् प्रार्थ्यते मया ॥१२०॥

तथाऽप्येतावदस्तु ।

(भरतवाक्यम्)

भूचक्रवालमहिता महतां कवीनां भग्नार्गलास्मुललिताः प्रसरन्तु वाचः ।
भूतिं परामुपगता भुवनैकवीरा भूपाश्च तेपु सुरलोकतरुर्भवन्तु ॥१२१॥

इति निष्क्रान्तः

निर्लज्जतायाः कस्याश्चिन्निर्बन्धाद् रचितं मया ।
इदं हासैकसक्तानां विदुषामस्तु तुष्टये ॥१२२॥

अथवा

श्रेयो हि मे तदिदमद्य महाजनानां हासास्पदं भवति चेदिदमेव भूयः ।
पूज्यो जडैरिति [हि] यत्तदपेक्षयाऽपि हास्यो महद्भिरिति यद्वरमेतदेव ॥१२३॥

शुभमस्तु ।

समाप्तोऽयं भागः ।

श्लोकसूची

अजस्रसंप्रस्रवदस्र०	...	६२
अधिष्ठितां हंसवरेण	...	६३
अपधीरयतीदमंग	...	५६
अम्भोधिगम्भीर इति	...	५
अयमञ्जलिरङ्गनामणे	...	६०
अयि भवति सव्रतभ्रू	...	४६
अरुणसरसिजाभं	...	११६
अरुणाधर एष	...	५६
अलसमुकुले निद्राभङ्गा०	...	१५
अवगत्य परव	...	४०
अस्मभ्यमव्याहतबाहुवीर्यो		४८
अस्रस्रावकषायितं	...	१००
आचार इत्याहतयावकार्द्रं	...	१०६
आतप्राचितकाञ्चन०	...	६७
आताम्राधरगण्ड०	...	३६
आलोललोचनविलास०	...	४४
इन्दिरानवकटाक्ष०	...	२
उभौ दधाताम्	...	१०३
उभौ सहार्यौ	...	८२
एकाणां हिअआणं	...	३
कम्पयन् पृथिवीं	...	४२
करुणां कुरु	...	५८
कलयन् कुवलयमालां	...	१४
का कान्तीरुधिरा०	...	६६
केचिन्मनोजं	...	४७
कोपाङ्गारोद्विरण०	...	७४
क्रमात् कृशे नातिकृशे	...	१०५
गत्वा किञ्चन	...	६६
गुणदोषकपास्तव	...	६
गृहीतपाणिरनया	...	६१
घनोपमातद्धन०	...	२५
घर्माम्भःकणिकांकुर०	...	६८
चकोरिका	...	११३
चन्द्रं निन्दति	...	३६
जलाशयाः पश्य	...	८४
जलधेरिव शिशिरकरो	...	६८
जागर्षि वा स्वपिषि	...	४३
जाता पुरारति०	...	२२
टात्कारयन्	...	७८
ततस्तैलोक्लासी	...	७७
तपन्ति ये	...	५३
तरुणतामिमे	...	४६
तस्यां शोभासरस्यां	...	१०६
तस्या भुजैनैकतरेण	...	३१
तस्यास्तामरसानुकारि	...	६४
तां वर्धमानां	...	२३
दीनः खल्वध्वनीनः	...	८६
दीनां दीनाम०	...	११२
देवानां मदिरायितः	...	१११
नयनमपिकामिश्रै०	...	११५
निर्भरपरस्परराग०	...	५१
निलज्जतायाः	...	१२२
निवारितः	...	१२३
नैसर्गिकाभिनव०	...	७५
पद्मे क्षणा पद्मवर्णा	...	४१
पश्यैष दूरपतितो०	...	६६
पीयूषस्रवसंभितानि	...	४७
पुरापतिद्यामृत०	...	१६
पुरा भ्रामं भ्रामं	...	८७
पुष्पेषून्	...	११७

पूर्वार्धौ विनिमज्ज्य	...	३०	लीलां लोचनसुखदाम्	...	६६
पृष्टमात्रे मया	...	८	लोलेक्षणाः किल०	...	११
प्रणयेन	...	१६	वाग्देवताकेलिरङ्ग०	...	४
प्रत्यङ्गं प्रमृशन्नयं	...	८८	वाणी सुधां	...	१०७
प्रथमसमागम०	...	५०	विजहिहि विगत०	...	६५
प्रभातवातेन	...	६	विभज्य संयुज्य	...	२६
प्रायेण सामग्र्य०	...	१०८	विरम विशालाक्षि	...	७०
प्रेमार्द्रश्रुतुर०	...	११८	विरहे प्राणनाथानां	...	१३
बालेन्दुवक्त्रे	...	२६	विलिखत्यवनीतलं	...	७२
भवति भवादृशि	...	८१	शशभृदिव विभाते	...	६२
भूचक्रवालमहिता	...	१२१	शाणोल्लीढशशाङ्क०	...	३४
भो भोः शौर्यसरित्पते	...	७६	शोणागारजिहीर्षुणा	...	६१
भो भोः शौर्यम्बुनिधे	...	७६	श्लथोत्तमानं	...	७१
भ्रमरो मम लोचनाम्बुजः	...	५७	श्रेयो हि मे	...	१२३
भ्रष्टावशिष्ट०	...	१२	स चानलिङ्गस्वकृशः	...	३०
मनसा प्रेमपूरेण	...	११४	स मन्दहासः	...	२०
मन्दमन्दचलदुल्लसद्	...	६०	सन्नाहः स्वल्पभूषो०	...	२१
मन्दाक्रान्तो	...	८३	सर्वे च	...	३१०
मन्दीकृतमकरन्दं	...	६४	सुभगानप्यनुभोगान्	...	५२
मादृशो मृगशावाक्षि	...	४५	सुमनस्यमायाः	...	१०२
माध्वीकधारापिकमाधुरीक०	...	२०	सुवर्णवर्णो	...	१०४
मैरेयं मधु	...	१०१	सुविमलेषु मनस्सु	...	३५
यदा सुभेरोश्चलनं	...	६७	सारसिका सा रसिका	...	३८
यद्यत्तमाऽसि	...	७३	सिद्धसाध्यं	...	१८,३७
यद्यत्तविलोक्याम्	...	३२	स्थलकमलदल०	...	५५
यावन्मनुष्यजातेः०	...	८०	स्थिरो धीरः	...	६५
यूनामनुरागजुषां	...	१७	स्निग्धाङ्गराग०	...	७
रक्तारक्ते	...	६२	स्पन्दते नयनं	...	५४
रत्नाङ्गुलीय०	...	८६	स्वकौशलं फलयति	...	१६
रागेण बिम्बाख्य०	...	२८	स्वस्यां शिक्षयजा	...	१
लक्ष्यन्ते पक्षिणोऽमी	...	८५	हे हेमकुम्भौ	...	३३